त्यजेत्। अधमे द्वादशी मात्रा मध्यमे द्विगुणा स्मृता। उत्तमे त्रिगुणा ज्ञेया प्राणायामस्य निर्णये। कनीयसि भवेत् स्वेदः कम्पो भवति मध्यमे। उत्तिष्ठत्युत्तमे प्राणी बद्धपद्मासनो मुहुः। जलेन श्रमजातेन गात्रमार्जनमाचरेत्। दृढता लघुता दीप्तिस्तेन गात्रस्य जायते। यदा तु नाडीशुद्धिः स्यात्तदा चिह्नानि बाह्यतः। जायन्ते योगिनो देहे तानि वक्ष्याम्यशेषतः। शरीरलघुता दीप्तिर्जठराग्निविवर्द्धनम्। कृशत्वञ्च शरीरस्य तस्य जायेत निश्चितम्। पूर्वोक्तकाले कुर्वीत परमाभ्यासमेव च। ततःपरं यथेष्टन्तु शक्तिः स्याद् वायुधारणे। यथेष्टधारणाद्वायोः सिद्धिः कुम्भस्य केवला। केवले कुम्भके सिद्धे रेचपूरकवर्जिते। न तस्य दुर्लभं किञ्चित् त्रिषु लोकेषु विद्यते”। [हेमच०।

**प्राणावाय** न० प्राणेनावैति अव+इ अच्। क्रियाविशाले

**प्राणासन** न० “एतत् प्राणासनं नाम सर्वसिद्धिप्रदायकम्। वायुं मूले समारोप्य ध्यात्वाऽऽकुञ्चय प्रसारयेत्। केवलं पादमेकञ्च स्कन्धे चारोप्य यत्नतः। एकपादेन गगने तिष्ठेत् स दण्डवत् प्रभो!। आपानासनमेतत् हि सर्वेषां पूरकाश्रयम्”। कृत्वा स्कन्धयोः पद्मं समारोप्याथ वायुभिः। तदा सिद्धो भवेत् मर्त्यः प्राणापानसमागमम्। अपानासनयोगेन कृत्वा योगेश्वरो भुवि” रुद्रयामलोक्ते पूजाङ्गे आसनभेदे।

**प्राणाहुति** स्त्री प्राणरूपेभ्योऽग्निभ्य आहुतिः। भोजनात् प्राक् स्वेष्टस्यकर्त्तव्ये प्राणरूपाग्न्युद्देश्यकाहुतौ तत्प्रकारश्च आह्नि०त० दर्शितो यथा

छन्दोगपरिशिष्टे “प्राणेभ्यस्त्वथ पञ्चभ्यः स्वाहा प्रणवसंयुताः। पञ्चाहुतीस्तु जुहुयात् प्रत्ययाग्निनिभेषु च”। प्राणाहुतिमुद्रामाह शौनकः “तर्ज्जनीमध्यमाङ्गुष्ठैर्लग्ना प्राणाहुतिर्भवेत्। मध्यमानामिकाङ्गुष्ठैरपाने जुहुयात्ततः। कनिष्ठानामिकाङ्गुष्ठैर्व्याने च जुहुयाद्धविः। तर्ज्जनीन्तु बहिष्कृत्वा उदाने जुहुयात्ततः। समाने सर्वहस्तेन समुदायाहुतिर्भवेत्”। स्मृत्यर्थसारे “प्राणाहुतौ घृताभावे पश्चात् भुञ्जीत नो घृतम्” अत्र पाठक्रमेण प्राणापानव्यानोदानसमानरूपेभ्य आहुतिरुक्ता। वैश्वानरविदस्तु छान्दो०उ०अन्यक्रम उक्तो यथा “तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं, स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति”। “अथ यां द्वितीयां जुहुयात्तां जुहुयाद्व्यानाय स्वाहेति व्यानस्तृप्यति”। “अथ यां तृतीयां जुहुयात्तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति”। “अथ यां चतुर्थीं जुहुयात्तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति”। “अथ यां पञ्चमीं जुहुयात्तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति”।

**प्राणिद्यूत** न० ६त०। समाह्वयाख्ये विवादपदभेदे अमरः। द्यूतशब्दे ३७७२ पृ० दृश्यम् “एष एव विधिर्ज्ञेयः प्राणिद्यूते समाह्वये” याज्ञ० द्यूतधर्मोऽतिदिष्टः। [मात्रे।

**प्राणिन्** नित्यम् त्रि०प्राणोऽस्त्यस्य इनि। जीवे चेतने जन्तु०

**प्राणिमातृ** स्त्री प्राणिनो मातेव। गर्भदात्रीक्षुपे राजनि०।

**प्राणिहित** त्रि० ६त०। १प्राणिनो हितसाधने २पादुकायां स्त्री त्रिका०। [प्रामीत्य तत्रार्थे पाठान्तरम्।

**प्राणीत्य** न० प्रणीतस्य प्रयुक्तस्य भावः ष्यञ्। ऋणे त्रिका०

**प्राणेश** पु० ६त०। १पत्यौ जटा०। २भार्य्यायां स्त्री हेमच०। ३वायौ पु० त्रिका०। प्राणेश्वराद्योऽप्यत्र।

**प्राण्यङ्ग** न० ६त०। प्राणिनोऽङ्गे अवयवे हस्तपादादौ तत्र उपसर्ज्जने “अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारिजम्। अतत्स्थं तत्र दृष्टञ्च तेन तद्वत् तथा युतम्” इत्युक्तलक्षणस्वाङ्गरूपकत्वे असंयोगोपधत्वे ङीष्। तत्र क्रोडादिबह्वचो नासिकोदरजङ्घादन्तकर्णशृङ्गाणाम् पुच्छस्य च विशेषोक्तेः संयोगोपधत्वेऽपि ङीष् स्यात्।

**प्रातःकृत्य** न० ७त०। शास्त्रविहिते प्रातःकर्त्तव्ये कर्मणि तच्च आचारशब्दे ६२२पृ०दर्शितम्। एवमन्यत्रापि यथायथं नानाशास्त्रे उक्तं दृश्यम्।

**प्रातःकाल** पु० कर्म०। १प्रभातकाले “प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु” स्मृतिपरिभाषिते सूर्य्योदयावधि मुहूर्त्तत्रयमिते २काले च।

**प्रातःसन्ध्या** स्त्री सन्धौ भवः यत् सन्ध्या ७त०। १गतरात्रेरनन्तरं मुहूर्त्तात्मके भाविसूर्य्योदयस्य मध्यवर्त्तिनि २दण्डचतुष्टयात्मके वा काले “त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम्। नाडीनां तदुभे सन्ध्ये दिवसाद्यन्तसंज्ञिते” ति०त०। सन्ध्या च ब्रह्मणो मनोजाता कन्या सा च वसिष्ठोपदेशेन तपः कृत्वा पूर्वप्रतिज्ञातस्याग्नौ शरीरत्यागस्य सम्पादनार्थं विष्णुवरेण पुरोडाशमयं देहमवाप्य मेधातिथियज्ञाग्नौ शरीरं जुहाव। तस्याः पूर्वार्द्धं प्रातःसन्ध्या। ३तस्याञ्च तत्कथा कालिकापु० २२अ० यथा “तदा विष्णोः प्रसादेन सा विवेश विधेः सुता। वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यस्य मण्डले। शुद्धं प्रवेश-